# shrIsundarastavaH

# શ્રીસુન્દરસ્તવઃ

## Document Information

Text title : sundarastavaH

File name : sundarastavaH.itx

Category : vishhnu

Location : doc_vishhnu

Proofread by : PSA Easwaran psawaswaran at gmail.com

Description/comments : Edited by S. V. Radhakrishna Shastriji

Acknowledge-Permission: Mahaperiaval Trust

Latest update : April 12, 2018

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 17, 2023

*sanskritdocuments.org*

# શ્રીસુન્દરસ્તવઃ

જામ્બવત્સ્મારિતબલં સાગરોલ્લઙ્ઘનોત્સુકમ્ ।
સ્મરતાં સ્ફૂર્તિદં દીનરક્ષકં નૌમિ મારુતિમ્ ॥ ૧॥

મૈનાક-સુરસા-સિંહીરતિલઙ્ઘ્યામ્બુધેસ્તટે ।
પૃષદંશાલ્પકાકારં તિષ્ઠન્તં નૌમિ મારુતિમ્ ॥ ૨॥

ત્રિકૂટશ‍ૃઙ્ગવૃક્ષાગ્રપ્રાકારાદિષ્વવસ્થિતમ્ ।
દુર્ગરક્ષેક્ષણોદ્વિગ્નચેતસં નૌમિ મારુતિમ્ ॥ ૩॥

લઙ્કયાઽધૃષ્યયા વામમુષ્ટિઘાતાવઘૂર્ણયા ।
ઉક્ત્વાઽઽયતિમનુજ્ઞાતં સોત્સાહં નૌમિ મારુતિમ્ ॥ ૪॥

વિવિધૈર્ભવનૈર્દીપ્તાં પુરીં રાક્ષસસઙ્કુલામ્ ।
પશ્યન્તં રાક્ષસેન્દ્રાન્તઃપુરગં નૌમિ મારુતિમ્ ॥ ૫॥

જ્યોત્સ્નાયાં નિશ્ચયતિરમ્યેષુ હર્મ્યેષુ જનકાત્મજામ્ ।
માર્ગમાણામદૃષ્ટ્વા તાં વિષણ્ણાં નૌમિ મારુતિમ્ ॥ ૬॥

કુમ્ભકર્ણાદિરક્ષોઽગ્ર્યપ્રાસાદાવૃતમુત્તમમ્ ।
સુગુપ્તં રાવણગૃહં વિશન્તં નૌમિ મારુતિમ્ ॥ ૭॥

પુષ્પકાખ્યં રાજગૃહં ભૂસ્વર્ગં વિસ્મયાવહમ્ ।
દૃષ્ટ્વાપ્યદૃષ્ટા વૈદેહી દુઃખિતં નૌમિ મારુતિમ્ ॥ ૮॥

રત્નોજ્જ્વલં વિશ્વકર્મનિર્મિતં કામગં શુભમ્ ।
પશ્યન્તં પુષ્પકં સ્ફારનયનં નૌમિ મારુતિમ્ ॥ ૯॥

સઙ્કુલાન્તઃપુરં સુપ્તનાનાર્યૌવતમચ્છલમ્ ।
દૃષ્ટ્વાઽપ્યવિકૃતં સીતાં દિદૃક્ષું નૌમિ મારુતિમ્ ॥ ૧૦॥

પીવાનં રાવણં સુપ્તં તત્પત્નીં શયનેઽન્યતઃ ।
દૃષ્ટ્વા સીતેતિ સંહૃષ્ટં ચપલં નૌમિ મારુતિમ્ ॥ ૧૧॥

સુપ્તસ્ત્રીદૃષ્ટિનષ્ટાત્મ બ્રહ્મચર્યવિશઙ્કિનમ્ ।
અપકમ્યાઽઽપાનભૂમિં ગચ્છન્તં નૌમિ મારુતિમ્ ॥ ૧૨॥

કાલાત્યય-નૃપક્રોધ-કાર્યાસિદ્ધિ-વિશઙ્કિતમ્ ।
નિર્વિણ્ણમપ્યનિર્વેદે દૃષ્ટાર્થં નૌમિ મારુતિમ્ ॥ ૧૩॥

પુનર્નિવૃત્તૌ કાપેયમાનુષાપાયશઙ્કિનમ્ ।
રામાદીન્ સિદ્ધયે નત્વોત્તિષ્ઠન્તં નૌમિ મારુતિમ્ ॥ ૧૪॥

સીતામશોકવનિકાનદ્યાં સ્નાનાર્થમેષ્યતીમ્ ।
દ્રષ્ટું પુષ્પિતવૃક્ષાગ્રનિલીનં નૌમિ મારુતિમ્ ॥ ૧૫॥

સીતાં દૃષ્ટ્વા શિંશપાધઃ સ્થિતાં ચારિત્રમાતૃકામ્ ।
મનસા રામમાસાદ્ય નિવૃત્તં નૌમિ મારુતિમ્ ॥ ૧૬॥

ઇહ સીતા તતો રામઃ ઈદૃશીયં સ તાદૃશઃ ।
અન્યોન્યમર્હત ઇતિ સ્તુવન્તં નૌમિ મારુતિમ્ ॥ ૧૭॥

રાક્ષસીવેષ્ટિતેહેયં તદ્દ્રષ્ટાહં નૃપાત્મજૌ ।
નમામિ સુકૃતં મેઽતીત્યાશ્વસ્તં નૌમિ મારુતિમ્ ॥ ૧૮॥

સુપ્તોત્થિતં દૃષ્ટપૂર્વં રાવણં પ્રમદાઽઽવૃતમ્ ।
સીતોપચ્છન્દકં દૃષ્ટ્વાઽવપ્લુતં નૌમિ મારુતિમ્ ॥ ૧૯॥

રાવણાગમનોદ્વિગ્નાં વિષણ્ણાં વીક્ષ્ય મૈથિલીમ્ ।
સર્વોપમાદ્રવ્યદૂરાં સીદન્તં નૌમિ મારુતિમ્ ॥ ૨૦॥

સાન્ત્વેનાનુપ્રદાનેન શૌર્યેણ જનકાત્મજામ્ ।
રક્ષોઽધિપે લોભયતિ વૃક્ષસ્થં નૌમિ મારુતિમ્ ॥ ૨૧॥

માં પ્રધૃષ્ય સતીં નશ્યેરિતિ તદ્ધિતવાદિનીમ્ ।
કરુણાં રૂપિણીં સીતાં પશ્યન્તં નૌમિ મારુતિમ્ ॥ ૨૨॥

માસદ્વયાવધિં કૃત્વ સ્મારયિત્વાઽઽત્મપૌરુષમ્ ।
અપયાતં રાવણં ધિક્કુર્વન્તં નૌમિ મારુતિમ્ ॥ ૨૩॥

કુલં વીર્યં પ્રેમ ગત્યન્તરાભાવં વિષ્ટવતીઃ ।
રાક્ષસીર્દુર્મુખીમુખ્યાઃ જિઘત્સું નૌમિ મારુતિમ્ ॥ ૨૪॥

ક્રુદ્ધાભિર્ભર્ત્સ્યમાનાં તાં આત્માનમનુશોચતીમ્ ।
દેવીં વિલોક્ય રુદતીં ખિદ્યન્તં નૌમિ મારુતિમ્ ॥ ૨૫॥

પુનર્નિર્ભત્સનપરાસ્વાસુ વેણીસ્પૃગઙ્ગુલિમ્ ।
માનુષ્યગર્હિણીં દેવીં પશ્યન્તં નૌમિ મારુતિમ્ ॥ ૨૬॥

વિલપન્તીં જનસ્થાનાહરણાદ્યનુચિન્તનૈઃ ।
પ્રાણત્યાગપરાં સીતાં દૃષ્ટ્વાऽऽર્તં નૌમિ મારુતિમ્ ॥ ૨૭॥

ત્રિજટાસ્વપ્રસંહૃષ્ટાં રક્ષઃસ્ત્રીભ્યોऽભયપ્રદામ્ ।
અસ્વસ્થહૃદયાં દેવીં પશ્યન્તં નૌમિ મારુતિમ્ ॥ ૨૮॥

અચિરાદાત્મનિર્યાતમદૃષ્ટ્વોદ્બન્ધનોદ્યતામ્ ।
સીતાં દૃષ્ટ્વા શિંશપાધ ઉદ્વિગ્નં નૌમિ મારુતિમ્ ॥ ૨૯॥

વામાક્ષ્યૂરુભુજસ્પન્દૈઃ નિમિત્તૈર્મુદિતાં શનૈઃ ।
સીતાં શાન્તજ્વરાં દૃષ્ટ્વા પ્રહૃષ્ટં નૌમિ મારુતિમ્ ॥ ૩૦॥

દૃષ્ટાऽત્રેયં કથં સાન્ત્વ્યોપેયાऽऽવેદ્યા ચ વેદ્મ્યહમ્ ।
ઇતિ રામકથાખ્યાનપ્રવૃત્તં ભોમિ મારુતિમ્ ॥ ૩૧॥

સુપ્તે રક્ષિગણે શ્રુત્વા શુભાં રામકથાં દ્રુમમ્ ।
ઉત્પશ્યન્તીં જનકજાં પશ્યન્તં નૌમિ મારુતિમ્ ॥ ૩૨॥

સ્વપ્ને કપિર્દુર્નિમિત્તં શ્રુતા રામકથા શુભા ।
દેવીં દ્વેધા વિમુહ્યન્તીં પશ્યન્તં નૌમિ મારુતિમ્ ॥ ૩૩॥

કા ત્વં વસિષ્ઠચન્દ્રાત્રિપત્નીષ્વિતિ વિતર્કિતૈઃ ।
સીતામૌનમપાસ્યન્તં પ્રણતં નૌમિ મારુતિમ્ ॥ ૩૪॥

રામદૂતોऽસ્મિ મા ભૈષીઃ શ્રદ્ધત્સ્વ પ્રતિનેષ્યસે ।
વિશઙ્કાં સન્ત્યજેત્યેવં વદન્તં નૌમિ મારુતિમ્ ॥ ૩૫॥

સુગ્રીવસખ્યં ભૂષાદ્યાવેદનં વાલિનો વધમ્ ।
તીર્ત્વાબ્ધિં દર્શનં દેવ્યા આરવ્યાન્તં નૌમિ મારુતિમ્ ॥ ૩૬॥

અભિજ્ઞાનેન સુગ્રીવોદ્યોગેન વિરહાધિના ।
સુખિનીં દુઃખિનીં દેવીં પશ્યન્તં નૌમિ મારુતિમ્ ॥ ૩૭॥

માનિનીં દૃઢવિસ્રમ્ભાં રાઘવોદ્યોગકાઙ્ક્ષિણીમ્ ।
રક્ષો જિત્વૈવ નેયાં તાં નમન્તં નૌમિ મારુતિમ્ ॥ ૩૮॥

કાકોદન્તં રામગુણાન્ દેવૃભક્તિં શિરોમણિમ્ ।

અભિજ્ઞાનતયા દાત્રીં ધ્યાયન્તં નૌમિ મારુતિમ્ ॥ ૩૯॥

મણૌ પ્રતીતામુત્સાહોદ્યોજનપ્રાર્થિનીં સતીમ્ ।
આશ્વાસયન્તમુચિતૈર્હેતુભિર્નૌમિ મારુતિમ્ ॥ ૪૦॥

પુનસ્તદેવાભિજ્ઞાનં સ્મારયન્ત્યા કૃતાશિષમ્ ।
મૈથિલ્યા મનસા રામમાસન્નં નૌમિ મારુતિમ્ ॥ ૪૧॥

દૃષ્ટ્વા સીતાં ધ્રુવે જન્યે જ્ઞાતું રક્ષોબલં વનમ્ ।
વિનાશ્ય તોરણાસીનં યુયુત્સું નૌમિ મારુતિમ્ ॥ ૪૨॥

રાક્ષસીજ્ઞાતવૃત્તાન્તરાવણપ્રેષિતાન્ક્ષણાત્ ।
નિઘ્નન્તં કિઙ્કરાનેકં જયષ્ણું નૌમિ મારુતિમ્ ॥ ૪૩॥

જયત્યતિબલ ઇતિ ગર્જન્તં પાદપાગ્રિના ।
દગ્ધ્વા ચૈત્યં પુનઃ સઙ્ગ્રામોત્યુકં નૌમિ મારુતિમ્ ॥ ૪૪॥

પરિઘીકૃત્ય સાલદ્રું પ્રહસ્તસુતમારણમ્ ।
દશગ્રીવબલેયત્તા જિજ્ઞાસું નૌમિ મારુતિમ્ ॥ ૪૫॥

સપ્તામાત્યસુતાનાત્મનિનદૈર્ગતિજીવિતાન્ ।
કૃત્વા પુનસ્તોરણાગ્રે લસન્તં નૌમિ મારુતિમ્ ॥ ૪૬॥

ઉદ્વિગ્નરાવણાજ્ઞપ્તપૃતનાપતિપઞ્ચકમ્ ।
પ્રાપય્ય પઞ્ચતાં તોરણાગ્રસ્થં નૌમિ મારુતિમ્ ॥ ૪૭॥

અક્ષં રાજાત્મજં વીરં દર્શનીયપરાક્રમમ્ ।
હત્વા નિયુદ્ધે તિષ્ઠન્તં તોરણે નૌમિ મારુતિમ્ ॥ ૪૮॥

નીતમિન્દ્રજિતાઽસ્ત્રેણ બ્રાહ્મેણ ક્ષણરોધિના ।
સભાસ્થરાવણોદીક્ષાવિસ્મિતં નૌમિ મારુતિમ્ ॥ ૪૯॥

દશાસ્યં મન્ત્રિસંવીતં વરોદીર્ણં મહાદ્યુતિમ્ ।
અનાદૃત્યાહવક્લાન્તિં પશ્યન્તં નૌમિ મારુતિમ્ ॥ ૫૦॥

કોઽસિ કસ્યાસિ કેનાત્રાગતો ભગ્નં વનં કુતઃ ।
પ્રહસ્તસ્યોત્તરં દાતુમુદ્યુક્તં નૌમિ મારુતિમ્ ॥ ૫૧॥

સુગ્રીવસચિવં રામદૂતં સીતોપલબ્ધયે ।
પ્રાપ્તમુક્ત્વા તદ્ધિતોક્તિનિરતં નૌમિ મારુતિમ્ ॥ ૫૨॥

ભ્રાતૃસાન્ત્વિતપૌલસ્ત્યાદિષ્ટવાલાગ્નિયોજનમ્ ।
કર્તવ્યચિન્તાઽતિવ્યગ્રમુદીર્ણં નૌમિ મારુતિમ્ ॥ ૫૩॥

વાલદાહભિયા સીતાપ્રાર્થનાશીતલાનલમ્ ।
પ્રીણયન્તં પુરીદાહાદ્ભીષણં નૌમિ મારુતિમ્ ॥ ૫૪॥

અવધ્ય ઇતિ વાલાગ્રન્યસ્તાગ્નિં નગરીં ક્ષણાત્ ।
દહન્તં સિદ્ધગન્ધર્વૈઃ સ્તુતં તં નૌમિ મારુતિમ્ ॥ ૫૫॥

લબ્ધા સીતા રિપુર્જ્ઞાતઃ બલં દૃષ્ટં વૃથાઽખિલમ્ ।
સીતાઽપિ મૌઢ્યાદ્દગ્ધેતિ સીદન્તં નૌમિ મારુતિમ્ ॥ ૫૬॥

આપૃચ્છ્ય મૈથિલીં રામદર્શનત્વરયાઽચલાત્ ।
ત્રિકૂટાદુત્પતન્તં તં કૃતાર્થં નૌમિ મારુતિમ્ ॥ ૫૭॥

સોપાયનૈરઙ્ગદાદ્યૈઃ ઉન્નદદ્ભિરુપાસ્થિતમ્ ।
દૃષ્ટા સીતેત્યુદીર્યાથ વ્યાખ્યાન્તં નૌમિ મારુતિમ્ ॥ ૫૮॥

તીર્વાઽન્વિષ્યોપલભ્યાશ્વાસ્ય ચ ભક્ત્યોપદિશ્ય ચ ।
દગ્ધ્વા દૃષ્ટ્વાઽઽગતોઽસ્મીતિ બ્રુવન્તં નૌમિ મારુતિમ્ ॥ ૫૯॥

દૃષ્ટ્વા સીતાં રામનામ શ્રાવયિત્વા સમાગતઃ ।
બ્રૂત કર્તવ્યમિત્યેતાન્ પૃચ્છન્તં નૌમિ મારુતિમ્ ॥ ૬૦॥

ન વયં કપિરાડત્ર પ્રમાણં પ્રતિયામ તમ્ ।
કુર્મસ્તદાદિષ્ટમિતિ પ્રત્યુક્તં નૌમિ મારુતિમ્ ॥ ૬૧॥

મધ્યેમાર્ગં મધુવને નિપીય મધુ પુષ્કલમ્ ।
નદદ્ભિર્વાનરૈઃ સાકં ક્રીડન્તં નૌમિ મારુતિમ્ ॥ ૬૨॥

માદ્યન્નૃત્યત્કપિવૃતં ધ્વસ્તે મધુવને ક્ષણાત્ ।
અભિયુક્તં દધિમુખેનાવ્યગ્રં નૌમિ મારુતિમ્ ॥ ૬૩॥

સીતાં દૃષ્ટાં મધુવનધ્વસાદ્વિજ્ઞાય તુષ્યતા ।
દિદૃક્ષિતં કપીશેનાત્યાદરાન્નૌમિ મારુતિમ્ ॥ ૬૪॥

નિશમ્ય સુગ્રીવાદેશં ત્વરિતૈઃ સખિભિર્વૃતમ્ ।
સુગ્રીવેણાદરાદ્દૃષ્ટં મહિતં નૌમિ મારુતિમ્ ॥ ૬૫॥

નિયતામક્ષતાં સીતામભિજ્ઞાનં મણિં ચ તમ્ ।
નિવેદ્ય પ્રાઞ્જલિં પ્રહ્વં કૃતાર્થં નૌમિ મારુતિમ્ ॥ ૬૬॥

દૃષ્ટ્વા ચૂડામણિં સાશ્રુ સ્મૃત્વા તાતવિદેહયોઃ ।
રામેણ વૃત્તવિસ્તારે ચોદિતં નૌમિ મારુતિમ્ ॥ ૬૭॥

વિસ્રમ્ભં તર્જનં શોકાવેગં ચ સમયાવધિમ્ ।
સન્દેશમુક્ત્વા કર્તવ્યોદ્યોજકં નૌમિ મારુતિમ્ ॥ ૬૮॥

ત્વચ્ચિત્તા ત્વયિ વિસ્રબ્ધા વિજિત્ય રિપુમઞ્જસા ।
પ્રત્યાદેયેતિ વિનયાદ્વદન્તં નૌમિ મારુતિમ્ ॥ ૬૯॥

સ્નિગ્ધરામપરીરમ્ભમુગ્ધસ્મેરમુખામ્બુજમ્ ।
હૃદયાસીનવૈદેહીરાઘવં નૌમિ મારુતિમ્ ॥ ૭૦॥

(સુન્દરકાણ્ડપ્રતિસર્ગસઙ્ગ્રહાત્મકઃ)
ઇતિ શ્રીબાલકૃષ્ણશાસ્ત્રિવિરચિતઃ સુન્દરસ્તવઃ સમ્પૂર્ણઃ ।

Proofread by PSA Easwaran

---

*shrIsundarastavaH*

pdf was typeset on September 17, 2023

Please send corrections to *sanskrit@cheerful.com*